कक्षा - **एम0 ए0** खण्डः - **प्रथमवर्षम्**, सेमेस्टर - **प्रथमं सत्रम्**, परीक्षा **2022**

विषयः - **संस्कृतम्** प्रश्नपत्रम् - **MSA-C112**

विवरणम् - संस्कृत**व्याकरणम्**

समयः - **होरात्रयम्** पूर्णांकाः **70**

**प्रथमः खण्डः**

**सूचना-** अस्मात् खण्डात् पञ्च प्रश्नाः समाधेयाः। तेषु एकः व्याख्यात्मकसूत्रेभ्यः एकश्च रूपसिद्धिभ्य आवश्यकरूपेण भवेताम्। त्रयः कुतोऽपि कर्तुं शक्नुवन्ति। सर्वे समानाङ्काः। 05x06 = 30

1. प्रत्याहारसूत्राणि विलिख्य तेषां व्याकरणशास्त्रे किं महत्त्वम् इति सोदाहरणं लेखनीयम्।
2. आभ्यन्तरप्रयत्नं लिखित्वा तस्य शास्त्रे प्रयोजनं किम्? लिख्यताम्।
3. संहिता-संयोग-पद-संज्ञाः ससूत्रं स्पष्टीक्रियन्ताम्।
4. गुणसंज्ञाविधायकसूत्रं प्रतिपाद्य तस्य प्रयोगस्थलानि स्पष्टीकरोतु।
5. **एङः पदान्तादति, तोर्लि** इत्येतयोर्व्याख्या **संस्कृतेन** करणीया।
6. **ससजुषो रुः, रो रि** एतयोः सूत्रयोर्व्याख्या **संस्कृतेन** विधेया।
7. **सुपि च, आर्धधातुकस्येड् वलादेः** सूत्रयोर्व्याख्या **संस्कृतेन** कार्या।
8. उपैधते, शिवोऽर्च्यः अनयोः सिद्धिः कार्या।
9. रमेशो वेदः पठतु। गोः दोग्धि पयः। उपाध्यायेन बालोऽन्तर्धत्ते। एतेषां वाक्यानां ससूत्रं वाक्यगताऽशुद्धिः परिहरणीया।
10. बभूव पदस्य ससूत्रं रूपसिद्धिः कार्या।

**द्वितीयः खण्डः**

**सूचना-** रुच्याणां केषाञ्चित् चतुर्णां प्रश्नानां विस्तृतोत्तराणि लेख्यानि। सर्वे समानाङ्काः। 10x4 = 40

11. कस्यामपि भाषायां सन्धिप्रक्रियया कोऽभिप्रायो नीयते? इति विविच्य संस्कृतसन्धीनां परिचयो देयः।
12. हरि-वारि-शब्दयोः रूपाणि लिखन्तु।
13. भूधातोः सार्वधातुकलकाराणां रूपाणि लिखन्तु।
14. संस्कृतव्याकरणे कति लकाराः? किं तेषां प्रयोजनम्? इति विविच्यताम्।
15. अपादानकारकस्य विस्तृतः परिचयो देयः।
16. व्याकरणस्य गौणप्रयोजनेषु **दुष्टः शब्दः, यस्तु प्रयुङ्क्ते** अनयोः स्पष्टता कार्या।
17. 'व्याकरण' शब्दस्य कः पदार्थः? महाभाष्यानुसारं विवेचना विधेया।
18. संगणकक्षेत्रे एमएस वर्ड (MS WORD) - इत्यनेन कोऽभिप्रायो गृह्यते? अस्य सामान्यः परिचयो विधेयः।